श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## युगल गीत



रोम रोम श्रीकृष्ण में डूबा, अंग अंग से उठती प्रीत।
अद्‌भुत छटा निहार प्रभु की, गोपियां गाती युगल गीत।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**

**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**

**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**

**दशमः स्कन्धः**

**॥ अथ पञ्चत्रिंशोऽध्यायः ॥**

**श्रीशुक उवाच**

**गोप्यः(ख्) कृष्णे वनं(म्) याते, तमनुद्रुतचेतसः ।**

**कृष्णलीलाः(फ्) प्रगायन्त्यो, निन्युर्दुःखेन वासरान् ॥ 1॥**

तमनुद्रु+ तचेतसः, निन्युर्+ दुःखेन

**गोप्य ऊचुः**

**वामबाहुकृतवामकपोलो,**

**वल्गितभ्रुरधरार्पितवेणुम् ।**

**कोमलाङ्गुलिभिराश्रितमार्गं(ङ्),**

**गोप्य ईरयति यत्र मुकुन्दः ॥ 2॥**

वाम+ बाहुकृतवा+ मकपोलो ,वल्गित+ भ्रुरधरार्+ पितवेणुम् ,

कोमला(ङ्)+ गुलिभिरा+ श्रितमार्गं(ङ्)

व्योमयानवनिताः(स्) सह सिद्धैर्-
विस्मितास्तदुपधार्य सलज्जाः ।
काममार्गणसमर्पितचित्ताः(ख्),
कश्मलं(म्) ययुरपस्मृतनीव्यः ॥ 3॥

व्योमया+ नवनिताः(स्), विस्मितास्+ तदु+ पधार्य ,
काम+ मार्गण+ समर्पित+ चित्ताः(ख्),
ययु+ रपस्+ मृतनीव्यः

हन्त चित्रमबलाः(श्) शृणुतेदं(म्),
हारहास उरसि स्थिरविद्युत् ।
नन्दसूनुरयमार्तजनानां(न्),
नर्मदो यर्हि कूजितवेणुः ॥ 4॥

चित्र+ मबलाः(श्),
नन्द+ सूनु+ रयमार्त+ जनानां(न्)

वृन्दशो व्रजवृषा मृगगावो,
वेणुवाद्यहृतचेतस आरात् ।
दन्तदष्टकवला धृतकर्णा,
निद्रिता लिखितचित्रमिवासन् ॥ 5 ॥

वेणु+ वाद्य+ हृतचेतस,दन्त+ दष्ट+ कवला,
लिखित+ चित्र+ मिवासन्

बर्हिणस्तबकधातुपलाशैर्-
बद्धमल्लपरिबर्हविडम्बः ।
कर्हिचित् सबल आलि स गोपैर्-
गाः(स्) समाह्वयति यत्र मुकुन्दः ॥ 6॥

बर्हिणस्+ तबकधा+ तुपलाशैर् ,
बद्ध+ मल्ल+ परिबर्ह+ विडम्बः,समाह्+ वयति

**तर्हि भग्नगतयः(स्) सरितो वै,**

**तत्पदाम्बुजरजोऽनिलनीतम् ।**

**स्पृहयतीर्वयमिवाबहुपुण्याः(फ्),**

**प्रेमवेपितभुजाः(स्) स्तिमितापः ॥ 7॥**

भग्न+ गतयः(स्) ,तत्पदाम्+ बुजरजोऽ+ निलनीतम् ,

स्पृहयतीर्+ वयमिवा+ बहुपुण्याः(फ्),

प्रेम+ वेपित+ भुजाः(स्)

**अनुचरैः(स्) समनुवर्णितवीर्य,**

**आदिपूरुष इवाचलभूतिः ।**

**वनचरो गिरितटेषु चरन्तीर्-**

**वेणुनाऽऽह्वयति गाः(स्) स यदा हि ॥ 8॥**

सम+ नुवर्णि+ तवीर्य ,इवा+ चलभूतिः,

वेणुनाऽऽह्+ वयति

**वनलतास्तरव आत्मनि विष्णुं(म्),**

**व्यं(ञ्)जयन्त्य इव पुष्पफलाढ्याः ।**

**प्रणतभारविटपा मधुधाराः(फ्),**

**प्रेमहृष्टतनवः(स्) ससृजुः(स्) स्म ॥ 9॥**

वनलतास्+ तरव, पुष्प+ फलाढ्याः,

प्रणत+ भार+ विटपा ,प्रेम+ हृष्ट+ तनवः(स्)

**दर्शनीयतिलको वनमाला-**

**दिव्यगन्धतुलसीमधुमत्तैः ।**

**अलिकुलैरलघुगीतमभीष्ट-**

**माद्रियन् यर्हि सन्धितवेणुः ॥ 10॥**

दर्शनी+ यतिलको , दिव्यगन्ध+ तुलसी+ मधुमत्तैः,

अलिकुलै+ रलघुगी+ तमभीष्ट ,सन्धि+ तवेणुः

सरसि सारसहं(व्)सविहङ्गाश्-

चारुगीतहृतचेतस एत्य ।

हरिमुपासत ते यतचित्ता,

हन्त मीलितदृशो धृतमौनाः ॥ 11॥

सारस+ हं(व्)स+ विहङ्गाश्, चारु+ गीतहृत+ चेतस ,हरि+ मुपासत, मीलि+ तदृशो

सहबलः(स्) स्रगवतं(व्)सविलासः(स्),

सानुषु क्षितिभृतो व्रजदेव्यः ।

हर्षयन् यर्हि वेणुरवेण,

जातहर्ष उपरम्भति विश्वम् ॥ 12॥

स्रगवतं(व्)+ सविलासः(स्),क्षिति+ भृतो, वेणु+ रवेण

महदतिक्रमणशं(ङ्)कितचेता,

मन्दमन्दमनुगर्जति मेघः ।

सुहृदमभ्यवर्षत् सुमनोभिश्-

छायया च विदधत् प्रतपत्रम् ॥ 13॥

महदति+ क्रमणशं(ङ्)+ कितचेता, मन्द+ मन्द+ मनुगर्जति, सुहृदमभ्+ यवर्षत्

विविधगोपचरणेषु विदग्धो,

वेणुवाद्य उरुधा निजशिक्षाः ।

तव सुतः(स्) सति यदाधरबिम्बे,

दत्तवेणुरनयत् स्वरजातीः ॥ 14॥

विविध+ गोप+ चरणेषु ,यदा+ धरबिम्बे ,दत्तवेणु+ रनयत्

सवनशस्तदुपधार्य सुरेशाः(श्),

शक्रशर्वपरमेष्ठिपुरोगाः ।

कवय आनतकन्धरचित्ताः(ख्),

कश्मलं(म्) ययुरनिश्चिततत्त्वाः ॥ 15॥

सवनशस्+ तदु+ पधार्य , शक्रशर्व+ परमेष्ठि+ पुरोगाः,

आनत+ कन्ध+ रचित्ताः(ख्),ययु+ रनिश्चित+ तत्त्वाः

**निजपदाब्जदलैर्ध्वजवज्र-**

**नीरजां(ङ्)कुशविचित्रललामैः ।**

**व्रजभुवः(श्) शमयन् खुरतोदं(म्),**

**वर्ष्मधुर्यगतिरीडितवेणुः ॥ 16॥**

निजपदाब्+ जदलैर्+ ध्वज+ वज्र ,

नीरजां(ङ्)+ कुशविचित्र+ ललामैः, वर्ष्म+ धुर्यगति+ रीडित+ वेणुः

**व्रजति तेन वयं(म्) सविलास,**

**वीक्षणार्पितमनोभववेगाः ।**

**कुजगतिं(ङ्) गमिता न विदामः(ख्),**

**कश्मलेन कबरं(म्) वसनं(म्) वा ॥ 17॥**

वीक्षणार्+ पितमनो+ भववेगाः

**मणिधरः(ख्) क्वचिदागणयन् गा,**

**मालया दयितगन्धतुलस्याः ।**

**प्रणयिनोऽनुचरस्य कदां(व्)से,**

**प्रक्षिपन् भुजमगायत यत्र ॥ 18॥**

क्वचिदा+ गणयन्, दयित+ गन्ध+ तुलस्याः,

प्रणयिनोऽ+ नुचरस्य

**क्वणितवेणुरववं(ञ्)चितचित्ताः(ख्),**

**कृष्णमन्वसत कृष्णगृहिण्यः ।**

**गुणगणार्णमनुगत्य हरिण्यो,**

**गोपिका इव विमुक्तगृहाशाः ॥ 19॥**

क्वणित+ वेणु+ रववं(ञ्)+ चितचित्ताः(ख्), कृष्ण+ मन्+ वसत,

गुणगणार्+ णमनुगत्य, विमुक्त+ गृहाशाः

**कुन्ददामकृतकौतुकवेषो,**

**गोपगोधनवृतो यमुनायाम् ।**

**नन्दसूनुरनघे तव वत्सो,**

**नर्मदः(फ्) प्रणयिनां(म्) विजहार ॥ 20॥**

कुन्ददा+ मकृत+ कौतुकवेषो, गोप+ गोध+ नवृतो ,नन्दसू+ नुरनघे

**मन्दवायुरुपवात्यनुकूलं(म्),**

**मानयन् मलयजस्पर्शेन ।**

**वन्दिनस्तमुपदेवगणा ये,**

**वाद्यगीतबलिभिः(फ्) परिवव्रुः ॥ 21॥**

मन्द+ वायुरुप+ वात्य+ नुकूलं(म्),मलय+ जस्पर्शेन ,

वन्दिनस्+ तमुप+ देवगणा, वाद्य+ गीत+ बलिभिः(फ्)

**वत्सलो व्रजगवां(म्) यदगध्रो,**

**वन्द्यमानचरणः(फ्) पथि वृद्धैः ।**

**कृत्स्नगोधनमुपोह्य दिनान्ते,**

**गीतवेणुरनुगेडितकीर्तिः ॥ 22॥**

वन्द्यमा+ नचरणः(फ्),कृत्स्न+ गोध+ नमुपोह्य ,गीत+ वेणुरनु+ गेडित+ कीर्तिः

**उत्सवं(म्) श्रमरुचापि दृशीना-**

**मुन्नयन् खुररजश्छुरितस्रक्।**

**दित्सयैति सुहृदाशिष एष,**

**देवकीजठरभूरुडुराजः॥ 23॥**

खुर+ रजश्+ छुरित+ स्रक्, देवकी+ जठरभू+ रुडुराजः

**मदविघूर्णितलोचन ईषन्,**

**मानदः(स्) स्वसुहृदां(म्) वनमाली ।**

**बदरपाण्डुवदनो मृदुगण्डं(म्),**

**मण्डयन् कनककुण्डललक्ष्म्या ॥ 24॥**

मदविघूर्+ णित+ लोचन ,बदर+ पाण्डु+ वदनो, कनक+ कुण्डल+ लक्ष्म्या

**यदुपतिर्द्विरदराजविहारो,**

**यामिनीपतिरिवैष दिनान्ते ।**

**मुदितवक्त्र उपयाति दुरन्तं(म्),**

**मोचयन् व्रजगवां(न्) दिनतापम् ॥ 25॥**

यदुपतिर्+ द्विर+ दराज+ विहारो, यामिनी+ पति+ रिवैष, मुदि+ तवक्त्र

**श्रीशुक उवाच**

**एवं(म्) व्रजस्त्रियो राजन्, कृष्णलीला नु गायतीः ।**

**रेमिरेऽहः(स्)सु तच्चित्तास्- तन्मनस्का महोदयाः ॥ 26॥**

तच्+ चित्तास्

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां(न्)**

**दशमस्कन्धे पूर्वार्धे वृन्दावनक्रीडायां(ङ्) गोपिकायुगलगीतं(न्)नाम पञ्चत्रिंशोऽध्यायः ॥**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

